# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (५)

२७.०८.२०११

# पुनरावर्तनम्

- मकारान्तः पुंलिङ्गः ‘इदम्’ शब्दः ।
- सौ परे ‘इदमो मः’ इति मस्य मः, ‘इदोऽय् पुंसि’ इति इदः अयादेशः । अयम् ।
- अन्यासु विभक्तिषु ‘त्यदादीनामः’,‘दश्च’ इति दस्य मः । इमौ, इमे । इमम्, इमौ, इमान् ।
- तृतीयादिषु अजादिषु ‘अनाप्यकः’ इति  इदः अनादेशः । अनेन, अनयोः ।
- तृतीयादिषु हलादिषु ‘हलि लोपः’ इति इदः लोपः । आभ्याम्, एभिः, अस्मै, इत्यादि ।

- ‘अनाऽप्यकः’, ‘हलि लोपः’ इति सूत्रयोः ‘अकः’ इति विद्यते । अककारस्य इदमः इत्यर्थः ।
- ककारयोगे तु अयकम्, इमकौ, इमके ।
- इदम्
- इद् अक् अम् (‘अव्ययसर्वनाम्नामकच् प्राक्टेः’ इति अकच्)
- इदकम् (सुँ) स्
- इदकम् स् (‘इदमो मः’ ७.२.१०८)
- अयकम् स् (‘इदोऽय् पुंसि’ – ७.२.१११)
- अयकम् (‘हल्ङ्याब्भ्यो दीर्घात्…’ – ६.१.६८)

- इदकम्   औ
- इदक  अ  औ  (‘त्यदादीनामः’ – ७.२.१०२)
- इदक     औ  (‘अतो गुणे’ – ६.१.९७)
- इमक     औ  (‘दश्च’ – ७.२.१०९)
- इमकौ        (‘वृद्धिरेचि’ – ६.१.८७)

- इमकम्, इमकौ, इमकान् ।
- इमकेन, इमकाभ्याम् इत्यादि ।
- सर्वासु विभक्तिषु ‘दश्च’ इति दस्य मः ।

# ३५०. इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ (२.४.३२)

- पञ्च पदानि । इदमः, अन्वादेशे, अश्, अनुदात्तः, तृतीयादौ ।
- अन्वादेशविषयस्य इदमः अनुदात्तः अशादेशः स्यात् तृतीयादौ ।
- अश्वचनं साकच्कार्थम् ।
- साकच्कस्य 'इदकम्' शब्दस्य तृतीयादिषु विभक्तिषु 'अश्' इति आदेशो भवति अन्वादेशविषये ।
- अशादेशे कृते आभ्याम्, एभिः, अस्मै इत्यादि इदम्-शब्दवद् रूपाणि ।
- अकच्-रहितस्य इदम्-शब्दस्य अशादेशं विनाऽपि एतानि रूपाणि सिध्यन्ति ।
- अतः अश्-वचनस्य प्रयोजनं साकच्के इदम्-शब्दे एव दृश्यते ।

# ३५१. द्वितीयाटौस्स्वेनः (२.४.३४)

- पदद्वयम् । द्वितीया-टा-ओस्सु, एनः ।
- 'इदमोऽन्वादेशे…' (२.४.३२) इत्यतः 'इदमः' इति, 'अन्वादेशे' इति, 'एतदस्त्रतसोः…' (२.४.३३) इत्यतः 'एतदः' इति च अनुवर्तते ।
- द्वितीयायां टा-ओसोः च परतः इदम्-एतदोः एनादेशः स्याद् अन्वादेशे ।
- किञ्चित्कार्यं विधातुम् उपात्तस्य कार्यान्तरं विधातुं पुनः उपादानम् अन्वादेशः ।
- यथा – 'अनेन व्याकरणम् अधीतम्, एनं छन्दोऽध्यापय' इति ।
- 'अनयोः पवित्रं कुलम् एनयोः प्रभूतं स्वम्' इति ।

- इदम्  अम्
- एन    अम्  (‘द्वितीयाटौस्स्वेनः’)
- एनम्                                 (‘अमि पूर्वः’ – ६.१.१०७)

- एनम्, एनौ, एनान् ।
- एनेन ।
- एनयोः ।

# मकारान्तः पुंलिङ्गः इदम्-शब्दः

| इदम्-शब्दस्य | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | अयम् | इमौ | इमे |
| | इमम्/एनम् | इमौ/एनौ | इमान्/एनान् |
| | अनेन/एनेन | आभ्याम् | एभिः |
| | अस्मै | आभ्याम् | एभ्यः |
| | अस्मात् | आभ्याम् | एभ्यः |
| | अस्य | अनयोः/एनयोः | एषाम् |
| | अस्मिन् | अनयोः/एनयोः | एषु |

अन्वादेशे द्वितीयाविभक्तौ टा-ओस् इत्येतयोश्च परयोः 'एन' इत्यादेशः । अन्यत्र तृतीयादिषु अन्वादेशे अशादेशे कृतेऽपि रूपे व्यत्ययः न ।

# मकारान्तः पुंलिङ्गः इदकम्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | अयकम् | इमकौ | इमके |
| | इमकम्/एनम् | इमकौ/एनौ | इमकान्/एनान् |
| | इमकेन/एनेन | इमकाभ्याम्/आभ्याम् | इमकैः/एभिः |
| | मकस्मै/अस्मै | इमकाभ्याम्/आभ्याम् | इमकेभ्यः/एभ्यः |
| | मकस्मात्/अस्मात् | इमकाभ्याम्/आभ्याम् | इमकेभ्यः/एभ्यः |
| | मकस्य/अस्य | इमकयोः/एनयोः | इमकेषाम्/एषाम् |
| | इमकस्मिन्/अस्मिन् | इमकयोः/एनयोः | इमकेषु/एषु |

साकच्कस्य इदकम्-शब्दस्य ‘अनाप्यकः’, ‘हलि लोपः’ इति सूत्रयोः प्रवृत्तिः नास्ति । अन्वादेशे तु अशादेशे कृते इदम्-शब्दवद् रूपम् ।

# णकारान्ताः पुंलिङ्गाः

- गणयतेः विच् ।
- ‘गण संख्याने’ इति चौरादिकः धातुः ।
- सुष्ठु गणयति इत्यर्थे
- सु गण (णिच्) इ (‘सत्यापपाश…’ – ३.१.२५ – इति स्वार्थे णिच्)
- सु गण् इ (‘अतो लोपः’ – ६.४.४८ – इति अल्लोपः)
- सु गण् इ (विच्) व् (‘अन्येभ्योऽपि दृश्यन्ते’ – ३.२.७४)
- सु गण् व् (‘णेरनिटि’ – ६.४.५१ इति णिलोपः)
- सुगण् (‘वेरपृक्तस्य’ – ६.१.६६ – इति वलोपः)
- सुगण् (‘कृत्तद्धितसमासाश्च’ – १.२.४ – इति प्रातिपदिकसंज्ञा)

- सुगण्, सुगणौ, सुगणः ।
- सुगण्ठ्सु / सुगण्ट्सु/सुगण्सु ।
- 'ङ्णोः कुक्टुक् शरि' इति टुग्-विकल्पः । 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति वार्तिकेन ठकारः विकल्पेन ।
- क्विप् । 'अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घः ।
- सुगाण्, सुगाणौ, सुगाणः ।
- सुगाण्ठ्सु / सुगाण्ट्सु/सुगाण्सु ।

# नकारान्ताः पुंलिङ्गाः

- नकारान्तः पुंलिङ्गः राजन्-शब्दः
- परत्वाद् उपधादीर्घः, हल्ङ्यादिलोपः, ततो नलोपः ।
- राजन् (सुँ) स्
- राजान् स् ('सर्वनामस्थाने चासम्बुद्धौ' – ६.४.८ – इति उपधादीर्घः)
- राजान् ('हल्ङ्याब्भ्यो…' – ६.१.६८ – इति सुलोपः)
- राजा ('नलोपः प्रातिपदिकान्तस्य' – ८.२.७ – इति नलोपः)

- हे राजन् स्
- हे राजन् ('हल्ङ्याब्भ्यो…' – ६.१.६८ – इति सुलोपः)



'नलोपः … ' इति प्राप्ते

# ३५२. न ङिसम्बुद्ध्योः (८.२.८)

- पदद्वयम् । न, ङि-सम्बुद्ध्योः ।
- 'नलोपः प्रातिपदिकान्तस्य' (८.२.७) इत्यनुवर्तते ।
- नस्य लोपो न स्याद् ङौ सम्बुद्धौ च ।
- हे राजन् ।

- ङौ तु छन्दस्युदाहरणम्, 'सुपां सुलुक्...' इति ङेः लुक्, निषेधसामर्थ्यात् प्रत्ययलक्षणम् , 'परमे व्योमन्' ।